.. Vatulanatha Sutras ..

# ॥ वातुलनाथस्सूत्राणि ॥

महासाहसवृत्त्य स्वरूपलाभः ॥ १ ॥

तल्लाभाद्युगपद्वृत्तिप्रवृत्तिः ॥ २ ॥

variation तल्लाभाच्छुरिता युगपद्वृत्तिप्रवृत्तिः ॥ २ ॥

उभयपट्टोद्ध्वट्टनान्महाशून्यताप्रवेशः ॥ ३ ॥

युग्मग्रासान्निरवकाशसंविन्निष्ठा ॥ ४ ॥

सिद्धयोगिनीसंघट्टान्महामेलापोदयः ॥ ५ ॥

त्रिकञ्चुकपरित्यागान्निराख्यपदावस्थितिः ॥ ६ ॥

वाक्चतुष्टयोदयविरामप्रथासु स्वरः प्रथते ॥ ७ ॥

रसत्रितयास्वादनेनानिच्छोच्छलितं विगतबन्धं परं ब्रह्म ॥ ८ ॥

देवीचतुष्टयोल्लासेन सदैव स्वविश्रान्त्यवस्थितिः ॥ ९ ॥

द्वादशवाहोदयेन महामरीचिविकासः ॥ १० ॥

चर्यापञ्चकोदये निस्तरङ्गसमावेशः ॥ ११ ॥

महाबोधसमावेशात्पुण्यपापासंबन्धः ॥ १२ ॥

अकथनकथाबलेन महाविस्मयमुद्रा प्राप्त्या खस्वरता ॥ १३ ॥

॥ इति शिवम् ॥

Encoded by Haresh Bakshi hbakshi@soundofindia.com

Please send corrections to sanskrit@cheerful.com
Last updated November 17, 2002